CAREERINDIA

# आदर्शप्रश्नपत्रम् – 2020-21
## कक्षा – द्वादशी (XII)
## संस्कृतम् (केन्द्रिकम्) कोड सं. – (322)

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः –**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 12 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् कालावधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् –**

| | |
|---|---|
| **अ – भागः बहुविकल्पात्मकः** | **40 अङ्काः** |
| **आ – भागः वर्णनात्मकः** | **40 अङ्काः** |

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।
(ii) अ – भागः बहुविकल्पात्मकः अस्ति।
(iii) आ – भागः वर्णनात्मकः अस्ति।
(iv) उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
(v) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(vii) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

www.careerindia.com

## अ - भागः

### बहुविकल्पात्मकाः प्रश्नाः 40 अङ्काः

| | | |
|---|---|---|
| | **अनुप्रयुक्तव्याकरणम्** | |
| 1. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिच्छेदपदं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)<br>(i) कस्य स्वजन**शब्दः+मे** लज्जाम् उत्पादयिष्यति।<br>(क) शब्दो मे (ख) शब्दमे (ग) शब्दस्मे<br>(ii) देहि **प्रत्युत्तरम्** ।<br>(क) प्रत् + युत्तरम् (ख) प्रति + उत्तरम् (ग) प्रत्य+उत्तरम्<br>(iii) अपूर्वः **खल्वस्य** आयासः।<br>(क) खलु + अस्य (ख) खल्व् + अस्य (ग) खल्+वस्य<br>(iv) **अन्यैः+ नृपैः** न एवम् आप्तम्।<br>(क) अन्यैनृपैः (ख) अन्यैरनृपैः (ग) अन्यैर्नृपैः<br>(v) मोहम् **उपगतस्तत्र** भवान्।<br>(क) उपगतः + तत्र (ख) उपगतस् + तत्र (ग) उपगत + तत्र<br>(vi) **भोजनान्ते** वारि विषावहम्।<br>(क) भोजन् + आन्ते (ख) भोजन + अन्ते (ग) भोज+नान्ते<br>(vii) **न + एकेन** अपि समं गता वसुमती।<br>(क) नैकेन (ख) नेकेन (ग) नायकेन | 1x6=6 |
| | | |
| 2. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नपञ्चकम्)<br>(i) यस्याः भर्ता **शक्रसमः** अस्ति।<br>(क) शक्रेण समः (ख) शक्रस्य समः (ग) शक्रे समः<br>(ii) सः **अश्वपृष्ठात्** अवतारयत्।<br>(क) अश्वात् पृष्ठात् (ख) अश्वस्य पृष्ठात् (ग) अश्वं पृष्ठात्<br>(iii) लक्ष्मणः **सक्रोधम्** अवदत्।<br>(क) क्रोधेन सहितम् (ख) क्रोधात् सह (ग) क्रोधस्य सहितम्<br>(iv) **ललाटपुटसंस्थिता** एषा भृकुटिः नियती इव व्यवस्थिता।<br>(क) ललाटपुटस्य संस्थिता (ख) ललाटपुटात् संस्थिता (ग) ललाटपुटे संस्थिता | 1x5=5 |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| | (v) तत्किमपि **<u>इच्छाम् अनतिक्रम्य</u>** पृच्छ।<br>(क) यथेच्छम् (ख) इच्छामनतिक्रम्य (ग) यथा इच्छाम्<br>(vi) जनः **<u>कामं च क्रोधं च लोभं च</u>** त्यजेत्।<br>(क) कामक्रोधलोभम् (ख) कामक्रोधलोभाः (ग) कामक्रोधलोभान्<br>(vii) राजकुमारी मदालसा **<u>सर्वविद्यासु निष्णाता</u>** जाता।<br>(क) सर्वविद्यानिष्णातः (ख) सर्वविद्यानिष्णाता (ग) सर्वविद्यनिष्णाता | |
| | | |
| 3. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) भवतः स्थैर्यमुत्पादयता मया एवम् **<u>अभिहितम्</u>**।<br>(क) अभि+धा+क्त (ख) अभि+हि+क्त (ग) अभि+ हित् +क्त<br>(ii) दौवारिकः भुशुण्डीं स्कन्धे निधाय निपुणं **<u>निरीक्षमाणः</u>** असीत्।<br>(क) निर्+इक्ष् +माणः (ख) निर्+ईक्ष्+अण् (ग) निर्+ईक्ष्+शानच्<br>(iii) यानि अनवद्यानि कर्माणि तानि **<u>सेव् + अनीयर्</u>**।<br>(क) सेवनीयानि (ख) सेवनीयम् (ग) सेवनीयः<br>(iv) अहं **<u>बलवान्</u>** सिद्धः सुखी च अस्मि।<br>(क) बल+वान् (ख) बल+मतुप् (ग) बल + आन्<br>(v) भगवन्! **<u>संन्यास + इन्</u>** तुरीयाश्रमसेवीति प्रणम्यते।<br>(क) संन्यासी (ख) संन्यासिनि (ग) संन्यासनि<br>(vi) एषा नियती इव **<u>व्यवस्थित + टाप्</u>** ।<br>(क) व्यवस्थितः (ख) व्यवस्थितम् (ग) व्यवस्थिता<br>(vii) या च मया **<u>पुत्रवती</u>**।<br>(क) पुत्रवत् + ङीप् (ख) पुत्र + ङीप् (ग) पुत्रवति + ङीप् | 1x6=6 |
| | | |
| 4. | **समुचितम् उपपदविभक्तिरूपं चिनुत– (केवलं प्रश्नत्रयम्)**<br>(i) -------------- न प्रमदितव्यम्।<br>(क) स्वाध्यायेन (ख) स्वाध्यायात् (ग) स्वाध्यायम्<br>(ii) सहोदरम् अपहाय राज्य ------------ प्रयच्छामि।<br>(क) पुत्राय (ख) पुत्रम् (ग) पुत्रस्य<br>(iii) ततः क्रमाद् राजनि -------------- सति सम्प्राप्तराज्य-सम्पत्तिर्मुञ्जः।<br>(क) दिवङ्गतेन (ख) दिवङ्गतस्य (ग) दिवङ्गते | 1x3=3 |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| | (iv) सः पुनः ------------- अनन्तरं तमेव पादध्वनिं श्रुतवान्।<br>(क) क्षणात् (ख) क्षणेन (ग) क्षणाय | |
| | | |
| | **पठितावबोधनम्** | |
| 5. | **भाषिककार्यम् – निर्देशानुसारम् उत्तराणि चिनुत - (केवलं प्रश्नषट्कम्)**<br>(i) "कुण्डला – राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता" '**सर्वविद्यानिष्णाता**' इति पदं कस्मै प्रयुक्तम्?<br>(क) मदालसायै (ख) कुण्डलायै (ग) जातायै<br>(ii) "**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्**" अत्र "**वार्धके**" इत्यस्य विलोमपदं किम् अस्ति?<br>(क) यौवने (ख) विषयैषिणाम् (ग) अभ्यस्तविद्यानाम्<br>(iii) "**रघूणामन्वयं वक्ष्ये**" अत्र 'वक्ष्ये' इति क्रियापदस्य कर्तृपदं किम्?<br>(क) अहम् (कालिदासः) (ख) रघूणाम् (ग) अन्वयः<br>(iv) '**आकारये अहं कुलगुरुं तुम्बुरुम्। असौ अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति**' अत्र "**असौ**" इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(क) अग्नये (ख) कुलगुरवे (ग) अकारये<br>(v) "**भवन्ति सम्पदं दैवीमभिजातस्य भारत**" अत्र '**अर्जुन**' इत्यर्थे किं पदं प्रयुक्तम्?<br>(क) सम्पदम् (ख ) दैवीम् (ग) भारत<br>(vi) "**अशुचौ नरके पतन्ति**" अत्र '**विशेषणपदम्** किम्?<br>(क) अशुचौ (ख) नरके (ग) पतन्ति<br>(vii) "**सार्ववर्णिकः पञ्चमो गेयवेदः**" अत्र '**विशेष्यपदम्** किम्?<br>(क) वर्णिकः (ख) पञ्चमः (ग) गेयवेदः | 1x6=6 |
| | | |
| 6. | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चिनुत – (केवलं प्रश्नचतुष्टयम्)**<br>(i) ततस्तयोरेवम् अभूत् **आलापः**।<br>(क) वार्तालापः (ख) कलहः (ग) विवादः<br>(ii) सर्वस्य **लोचनं** शास्त्रम्।<br>(क) मुखम् (ख) नेत्रम् (ग) कर्णम्<br>(iii) केवलं महाराजशिववीरस्याज्ञां वयं सिरसा **वहामः**।<br>(क) पालयामः (ख) तिरस्कुर्मः (ग) अवमानयामः | 1×4=4 |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| | (iv) वस्तु **निमेषमात्रेण** विनाशं भजेत्।<br>(क) अकस्मात् (ख) केवलम् (ग) क्षणमात्रेण<br>(v) मत्कृते आवश्यकता नास्ति **अवलम्बनस्य**।<br>(क) वित्तस्य (ख) सहायतायाः (ग) श्रमस्य | |
| | | |
| | **संस्कृतसाहित्येतिहासपरिचयः** | |
| 7. | **समुचितस्य रचनायाः कवेः वा अभिधानं चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) **"बुद्धचरितम्"** अस्याः रचनायाः लेखकः कः?<br>(क) कालिदासः (ख) अश्वघोषः (ग) भासः<br>(ii) "**अम्बिकादत्तव्यासः**" अस्य लेखकस्य रचना का?<br>(क) भोजप्रबन्धः (ख) प्रतापविजयः (ग) शिवराजविजयः<br>(iii) **"आचार्या वेदकुमारी घई"** कं पाठ्यांशं लिखितवती?<br>(क) मदालसा (ख) प्रतीक्षा (ग) विद्यास्थानानि<br>(iv) **नैकेनापि समं गता वसुमती** अस्य पाठस्य रचयिता कः?<br>(क) कालिदासः (ख) बल्लालसेनः (ग) बाणः | 1×3=3 |
| | | |
| 8. | **गद्य-पद्य-नाटकस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नत्रयम्)**<br>(i) **"छन्दोरहितम्"** काव्यं किं कथ्यते?<br>(क) पद्यम् (ख) गद्यम् (ग) नाट्यम्<br>(ii) "**मा निषाद प्रतिष्ठां त्वमगः शाश्वतीः समाः**" इति उदाहरणं कस्य अस्ति?<br>(क) पद्यस्य (ख) नाट्यस्य (ग) गद्यस्य<br>(iii) "**नायकः**" कुत्र अनिवार्यः भवति?<br>(क) काव्ये (ख) नाट्ये (ग) गद्ये<br>(iv) **नाट्यस्य** अपरं नाम किम् ?<br>(क) रूपकम् (ख) विदूषकम् (ग) जनान्तिकम् | 1x3=3 |
| | | |
| 9. | **गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) **"चम्पूकाव्यम्"** कीदृशं भवति ?<br>(क) गद्यमयम् (ख) पद्यमयम् (ग) गद्यपद्यमयम्<br>(ii) "**पद्यकाव्यम्**" अस्य वैशिष्ट्यं किं भवति?<br>(क) गेयता (ख) छन्दाभावः (ग) प्रहसनम् | 1x4=4 |

www.careerindia.com

| | | |
|---|---|---|
| | (iii) "**नायिकायाः** " अनिवार्यता कुत्र न भवति?<br>(क) नाट्ये (ख) चम्पूकाव्ये (ग) रूपके<br>(iv) "**गद्यकाव्यम्**" अस्य वैशिष्ट्यं किं नास्ति?<br>(क) लघुता (ख) श्लिष्टता (ग) छन्दोबद्धता<br>(v) **गद्यं** कवीनां किं वदन्ति?<br>(क) निकषम् (ख) छन्दः (ग) रसम् | |

## आ - भागः

### वर्णनात्मकाः प्रश्नाः अङ्काः 40

| | | |
|---|---|---|
| | **अपठितावबोधनम्** | |
| 10. | **अधोलिखितं अपठतगद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत -**<br>अखिलभारतस्य सञ्चारं कृत्वा विवेकानन्देन नैके अनुभवाः प्राप्ताः। तेषां निष्पीडनात् तेन आविष्कृतम् इदमेकं सत्यं यत् 'आध्यत्मिकता एव भारतस्य मेरुदण्डः' इति। तादृशः महिमा भारतस्य धुरि विद्यते चेदपि देशवासिषु, समाजे, राष्ट्रस्य सर्वक्षेत्रेषु अपि कुतः एतावान् कलहः, क्षोभः, विप्लवः च? एतादृशी भेदभावना कुतः? एतस्य विरोधस्य परिहारः साध्यः उत न ?' इति चिन्ताक्रमः स्वामिनो मनसि जातः। परिहारस्य अन्वेषणं करणीयम् एव इति दृढमतिं कृत्वा सः विचारसमुद्रम् अवगाहितवान्। युगपद् एव कन्याकुमार्याः तरङ्गितसमुद्रेऽपि कूर्दितवान्। यथा कश्चित् पिता माता इव मृदुतया शिशुं ग्रहीतुम् अजानन् उत्क्षेपणादिकं कृत्वा शिशुना सह क्रीडति तथैव तरङ्गाः अपि पातनोत्पातनपूर्वं तम् इतस्ततः अघूर्णयन्। न केवलं बाह्यतरङ्गाः, राष्ट्रस्य दुःस्थितिरूपाः आन्तरिकचिन्तातरङ्गाः अपि तस्य चित्तम् अमथ्नन्। त्रयाणां समुद्राणां सङ्गमे दीर्घकालं तरणं कृत्वा सः एकस्यां शिलायाम् उपाविशत्। भारतीयपरम्परायाः दृश्यानि, भारतेतिहासस्य उन्नत्यवनत्योः च दृश्यानि क्रमशः तस्य चित्तादर्शे प्रतिबिम्बितानि अभवन्। | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) विरोधस्य परिहारस्य किं करणीयम्?<br>(ii) स्वामिनो मनसि कः जातः?<br>(iii) विवेकानन्दः कस्याः तरङ्गितसमुद्रेऽपि कूर्दितवान्?<br>(iv) भारतेतिहासस्य कयोः दृश्यानि प्रतिबिम्बितानि अभवन्?<br>(v) पिता का इव शिशुना सह क्रीडति? | ½×4=2 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) भारतस्य सञ्चारं कृत्वा स्वामिना के प्राप्ताः? | 2×2=4 |

www.careerindia.com

| | | |
|---|---|---|
| | (ii) के स्वामिनः चित्तम् अमथ्नन्?<br>(iii) समुद्राणां सङ्गमे स्वामी किं कृतवान्?<br>**(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।**<br>**(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) "तेन नैके अनुभवाः प्राप्ताः" इत्यस्मिन् वाक्ये 'तेन' इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(ii) "कूर्दितवान्" इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?<br>(iii) "एतावान् कलहः" इत्यनयोः पदयोः किं विशेषणपदम्?<br>(iv) "उन्नतिः" इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत। | <br><br>1×1=1<br>1×3=3 |
| | | |
| | **रचनात्मककार्यम्** | |
| 11. | **भवान् सर्वेशः उदयपुरे वसति। भवान् उदयपुरस्य सौन्दर्यं द्रष्टुं स्वमित्रं चन्द्रेशम् आमन्त्रयति। अत्र मञ्जूषापदानां सहायतया इदं पत्रं सम्पूर्य पुनः लिखतु -**<br>दिनाङ्कः..................<br>10/15, हिरण्यनगरी<br>(i) ......................<br>प्रिय सुहृद् (ii) .................... !<br>शुभं भवतु।<br>निवेदनम् इदमस्ति यत् अत्र सर्वं कुशलं वर्तते, भवतः कुशलताम् इच्छामि। मित्रवर! इदम् उदयपुरनगरम् अतीव (iii) ........................ वर्तते । इदं नगरं महाराणा-उदयसिंह-राजाधिराजेन (iv) ............................. आसीत्। इदं प्रतीयते यत् एतत् नगरं धरायाः (v) ............................... अस्ति। इदं सरोवराणां नगरमपि कथ्यते। यतः अत्र अनेके (vi) ....................... सन्ति । अनेन अत्र ग्रीष्मस्य अनुभवः अपि न भवति। निकटे एव महाराणा-प्रताप-महाभागानां स्मरणं कारयन्ती (vii) ….............अपि वर्तते। अत्र भूमिः रक्तवर्णा अस्ति । समीपे एव स्थितं वैष्णव-सम्प्रदायस्य प्रसिद्धं (viii) .............. नाथद्वारा अपि अस्ति। यत्र जनाः अहर्निशं तीर्थयात्रां कर्तुम् आगच्छन्ति। एकलिङ्ग-महादेवस्य (ix)................. आर्य-समाजस्य प्रवर्तकस्य महर्षि-दयानन्दस्य संस्मरणं कारयति। यत्र महर्षिः दयानन्दः सत्यार्थप्रकाश-महाग्रन्थं रचितवान् । मित्र ! मम अतीव अभिलाषा वर्तते यत् भवान् अवश्यमेव अस्य नगरस्य (x) ................... अत्र शीघ्रम् आगच्छेत्। अहं त्वां समस्ते क्षेत्रे नेष्यामि । शीघ्रं स्वागमनस्य सूचनां यच्छतु भवान् । | ½×10=5 |

www.careerindia.com

| | | |
|---|---|---|
| | भवदीयं मित्रम्<br>**मञ्जूषा** सर्वेशः<br>देवालयः, हल्दीघाटी, चन्द्रेश, स्थापितम् , दर्शनार्थम्, उदयपुरतः, सरोवराः, स्वर्गम्, सौन्दर्ययुक्तम्, तीर्थम् । | |
| | | |
| 12. | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**<br>भारतीयः योगी सर्वत्र (i) ................., विश्वे सर्वदिक्षु स्वस्य योगबलात् अध्यात्मज्ञानं प्रसारितवान् स्वामिविवेकानन्दः। विदेशेषु तेन प्राप्ताः (ii) ........... असङ्ख्काः। स्वामी महानौकया चीनदेशं प्राप्नोत्। तत्र (iii) .......... चीनेतरजनानां प्रवेशः निषिद्धः इति सः जानाति स्म। तथापि इतरमतेषु विद्यमानाः उत्कृष्टाः अंशाः (iv) ........... इति धिया सः बलात् मन्दिरमेकं प्रविष्टवान्। सपदि द्वित्राः रक्षकाः (v)............. उपरुध्य स्थिताः। स्वामिनः (vi) .............कश्चन द्विभाषाज्ञः अनुवादकः आसीत्। यदा सः अपि (vii) ........ उद्युक्तः तदा स्वामी तं गृहीत्वा 'महोदय ! योगी इति पदं (viii) .......... कथम् अभिधीयते 'इति अपृच्छत्। (ix)............ तत् पदं त्वरया उच्चार्य अपगतः। क्षणान्तरे स्वामी रक्षकान् उद्दिश्य ' अहं भारतदेशात् आगतः योगी अस्मि' इति उच्चैः अवदत्। आश्चर्यं नाम ! (x) ............... चीनरक्षकाः स्वामिनं नमस्कृतवन्तः सत्कृतवन्तः च।<br>**मञ्जूषा-**<br>मन्दिरेषु, पूज्यते, ज्ञातव्याः, साहाय्यार्थम्, स्वामिनम्, अनुवादकः, प्रहरणोद्युक्ताः, चीनभाषया, अनुभवाः, पलायने। | ½×10=5 |
| | **अथवा** | |
| | **अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।**<br>**वैद्यः** - आगच्छ पुत्र। किं जातम् ? ज्वरः अस्ति किम् ?<br>**राजीवः** - ........................................................।<br>**वैद्यः** - एवम्। ज्वरः न अस्ति । उदरे पीडा वर्तते। ह्यः किं भक्षितम्?<br>**राजीवः** - ..............................................।<br>**वैद्यः** - अहो! आपणे आलुकस्य वटकाः खादिताः। किं न जानासि? अधुना बहिः खाद्यवस्तूनि न खादितव्यानि। एतत् चूर्णं स्वीकरोतु।<br>**राजीवः** - ........................................................................। | 1x5=5 |

www.careerindia.com

| | | |
|---|---|---|
| | **वैद्यः** - अरे नहि! कटुः नास्ति। पुनरपि औषधेः कृते स्वादः न गणनीयः।<br>**राजीवः** - ..................................................।<br>**वैद्यः** - दिने त्रिवारम् एकचमसमात्रम् उष्णजलेन ग्रहीतव्यम्।<br>**राजीवः** - ............................................... ।<br>**वैद्यः** - पुन: आगमनस्य आवश्यकता एव न भविष्यति । स्वास्थ्यं प्रति भविष्ये जागरुकः भव। आरोग्यं परमं सुखम्।<br>**राजीवः** - धन्यवादः। प्रणमामि। | |
| | | |
| 13. | "भारतीयाः कृषकाः" इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत।<br>(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम्।)<br>**मञ्जूषा-**<br>अस्ति, अस्माकम्, वर्षाजलम्, बीजानि, कृषिक्षेत्रेषु, पशवः, अन्नम्, चिन्तनीयदशा, च, कृषकाः, वपति, आधुनिकसाधनैः, सर्वकारः, धनाभावेन, परिश्रमम्, कर्त्तव्यम्, रक्षणम्।<br>**अथवा**<br>निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -(केवलं वाक्यपञ्चकम्)<br>1. पहले भारत विश्वगुरु कहलाता था।<br>India was formerly called Vishwaguru.<br>2. राजस्थान वीरों की जन्मदायिनी भूमि है।<br>Rajasthan is the birthplace of heroes.<br>3. साहित्य में समाज प्रतिबिम्बित होता है।<br>Society is reflected in literature.<br>4. थोड़ा जानने वाला व्यक्ति ही निरन्तर बोलता रहता है।<br>Only a man with little knowledge speaks continuously.<br>5. गुणवान् व्यक्ति ही गुण को जानता है।<br>Only the learned can perceive the meritorious.<br>6. माँ बच्चे से प्यार करती है।<br>A mother loves her child.<br>7. इसका प्रयास निश्चय ही प्रशंसनीय है।<br>His/Her effort is certainly praiseworthy. | 1×5=5<br><br><br><br><br><br>1×5=5 |

www.careerindia.com

| | | |
|---|---|---|
| | | |
| | **पठितावबोधनम्** | |
| 14. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>पुरा धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच। ततः क्रमाद् राजनि दिवङ्गते सम्प्राप्तराज्यसम्पत्तिर्मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास। अथ कदाचन सभायां ज्योतिः शास्त्रपारङ्गतः कश्चन ब्राह्मण: समागम्य राजानम् आह - देव! लोकाः मां सर्वज्ञं कथयन्ति। तत्किमपि यथेच्छं पृच्छ। | 3 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) राज्ञः पुत्रस्य नाम किम्?<br>(ii) राजा कस्मै राज्यभारं दत्तवान् ?<br>(iii) सभायां ज्योतिः शास्त्रपारङ्गतः कः समागतः? | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम् )**<br>(i) राजा मुख्यामात्यानाहूय किं विचारयामास?<br>(ii) सम्प्राप्तराज्यसम्पत्तिर्मुञ्जः किमकरोत्? | 2×1=2 |
| | | |
| 15. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -**<br>**स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।**<br>**विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥** | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) मौनं केन विनिर्मितम् ?<br>(ii) अपण्डितानां कृते मौनं किम्?<br>(iii) केषां समाजे मौनं भूषणम् ? | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)**<br>(i) कीदृशं गुणं विधात्रा विनिर्मितम्?<br>(ii) मौनमपण्डितानां कुत्र विभूषणम् ? | 1×2=2 |
| | | |

www.careerindia.com

CAREERINDIA

<table>
<tr><td>16.</td><td>अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>सीता - आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।<br>रामः - सुमित्रामातः! किमिदम्?<br>लक्ष्मणः - कथं कथं किमिदं नाम।<br>क्रमप्राप्ते हृते राज्ये भुवि शोच्यासने नृपे।<br>इदानीमपि सन्देहः किं क्षमा निर्मनस्विता॥<br>रामः - सुमित्रामातः! अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति। आ: अपण्डित: खलु भवान्।<br>भरतो वा भवेद् राजा वयं वा ननु तत् समम्।<br>यदि तेऽस्ति धनुश्श्लाघा स राजा परिपाल्यताम्॥<br>लक्ष्मणः – न शक्नोमि रोषं धारयितुम्। भवतु भवतु। गच्छामस्तावत्। (प्रस्थितः)<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) रोदितव्ये काले सौमित्रिणा किं गृहीतम्?<br>(ii) रामस्य राज्यभ्रंशः लक्ष्मणस्य किं जनयति?<br>(iii) लक्ष्मणः कं धारयितुं न शक्नोति?<br>(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)<br>(i) धनुश्श्लाघा अस्ति चेत् लक्ष्मणः किं परिपाल्यताम्?<br>(ii) रामः लक्ष्मणं किं बोधयति?</td><td>3<br><br><br><br><br><br><br><br><br><br><br>½×2=1<br><br><br><br>2×1= 2</td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>17.</td><td>अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –<br>इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।<br>इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥<br>भावार्थः –<br>श्रीकृष्णः कथयति यत् मूढः अज्ञानविमोहितः जनः (i) ........... भवति, किञ्चिद् अल्पमपि प्राप्य (ii)............. भवति यत् अद्य मया इदं प्राप्तम् अतः अहम् अन्यम् अपि स्वमनोरथं शीघ्रमेव (iii) ................. यत् किञ्चिद् मम अस्ति तत् तु मम अस्ति एव परम् अन्यत् सर्वं (iv)............... च मम एव भविष्यति।<br>मञ्जूषा –<br>प्राप्तुं समर्थः, अतिलोलुपः, धनमैश्वर्यम्, आत्माभिमानी।</td><td>½×4=2</td></tr>
</table>

www.careerindia.com

| | | |
|---|---|---|
| | **अथवा**<br>**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**<br>**(क) 'दीर्घप्रयासेन कृतं वस्तु निमेषमात्रेण विनाशं भजेत्।'**<br>(i) बहुप्रयत्नेन साधितं वस्तु विनाशं गच्छति।<br>(ii) महता प्रयत्नेन साधितं कार्यं क्षणमात्रेण विनश्यति।<br>(iii) अति प्रयत्नेन कृतं कार्यं भजनं करोति।<br>**(ख) 'सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।'**<br>(i) दुष्टानां प्रयासः सुवचनं त्यक्त्वा दोषेषु/व्यसनेषु भवति।<br>(ii) सज्जनानां सुवचनं त्याज्यं भवति।<br>(iii) खलः नरः दुष्टताम् आचरति। | 1×2=2 |
| | | |
| 18. | **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत -**<br>**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**<br>**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥**<br>**अन्वयः –**<br>शैशवे (i) .................... (रघुवंशिनां) यौवने (ii) .................... वार्द्धके (iii) ...............अन्ते योगेन (iv) .................... (रघूणाम् अन्वयं वक्ष्ये)।<br>**अथवा**<br>**प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत-** | ½×4=2<br><br>2x1=2 |
| | | |
| 19. | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -**<br>**'क' स्तम्भः** — **'ख' स्तम्भः**<br>(i) परीक्षार्थमुद्यतोऽस्मि — (क) पत्न्याः सहयोगः अनिवार्यः।<br>(ii) लक्ष्म्याः रक्षार्थम् — (ख) मम सखीविचाराः।<br>(iii) अपि श्रुताः भवद्भिः — (ग) अनन्तपारो गभीरश्च।<br>(iv) ज्ञानोदधिस्तु — (घ) गृहस्थाश्रमप्रयोगशालायाम्। | ½×4=2 |

www.careerindia.com